वृत्तिः प्राणाद्या वायवः पञ्च"। इति अत्र कश्चित् प्राणाद्या वायुविशेषा एव ते चान्तःकरणवृत्त्या जीवनयोनिप्रयत्नरूपया व्याप्रियन्त इति कृत्वा प्राणाद्यान्तःकरणवृत्तिरित्यभेदनिर्देश इत्याह। तन्न। "न वायुक्रिये पृथगुपदेशादिति" वेदान्तसूत्रेण प्राणस्य वायुत्ववायुपरिणामत्वयोः स्फुटं प्रतिषेधात्तत्रापि तदेकवाक्यतौचित्यात् मनोधर्मस्य कामादेः प्राणक्षोभकतया सामानाधिकरण्येनैवौचित्याच्च। वायुप्राणयोः पृथगुपदेशश्रुतयस्तु "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य धारिणी" इत्याद्याः। अतएव लिङ्गशरीरमध्ये प्राणानामगणनेऽपि न न्यूनता बुद्धेरेव क्रियाशक्त्या सूत्रात्मप्राणादिनामकत्वादिति। अन्तःकरणपरिणामेऽपि वायुतुल्यसञ्चारविशेषाद्वायुदेवताधिष्ठितत्वाच्च वायुव्यवहारोपपत्तिरिति" प्र०भा०। १२इन्द्रियस्थाने "सप्त शिरसि प्राणाः प्राणाः इन्द्रियाणि" ताण्ड्य० ब्रा० १।१५।२ "सप्त शीर्षण्याः प्राणाः मुखं नासिके अक्षिणी इन्द्रियाधिष्टानत्वात्" भा०। १३प्राणे ग्रहशब्दे २७४६पृ० दृ०। १४देहस्यच्छिद्रे च

तत्र प्राणोत्पत्तिमभिधाय तस्य गौणमुख्यभावः संख्याविशेषावधारणम् इन्द्रियसामान्यवृत्तितो भेदादिकञ्च शा०सू०भा० २।४ पादे समर्थितं यथा

"सप्त गतेर्विशेषितत्वाच्च" सू० "उत्पत्तिविषयः श्रुतिविप्रतिषेधः प्राणानां परिहृतः, संख्याविषय इदानीं परिह्रियते। तत्र मुख्यं प्राणमुपरिष्टाद्वक्ष्यति। सम्प्रति तु कतीतरे प्राणा इति सम्प्रधारयति। श्रुतिविप्रतिपत्तेश्चात्र विशयः। क्वचित् सप्त प्राणाः सङ्कीर्त्यन्ते "सप्त प्राणाः प्रभवन्ति तस्मात्" इति। क्वचिदष्टौ प्राणा ग्रहत्वेन गुणेन सङ्कीर्त्यन्ते "अष्टौ ग्रहा अष्टावतिग्रहाः" इति, क्वचिन्नव "सप्त वै शीर्षण्याः प्राणा द्वाववाञ्चौ" इति। क्वचिद्दश "नव वै पुरुषे प्राणा नाभिर्दशमी" इति। क्वचिदेकादश "दशेमे पुरुषे प्राणा आत्मैकादशः" इति। क्वचिद्द्वादश "सर्वेषां स्पर्शानां त्वगेकायनम्" इत्यत्र। क्वचित्त्रयोदश "चक्षुश्च द्रष्टव्यञ्च" इत्यत्र। एवं हि विप्रतिपन्नाः प्राणेयत्तां प्रति श्रुतयः। किं तावत् प्राप्तं सप्तैव प्राणा इति। कुतः गतेः, यतस्तावन्तोऽवगम्यन्ते "सप्त प्राणाः प्रभवन्ति तस्मात्" इत्येवंविधासु श्रुतिषु। विशेषिताश्चैते "सप्त वै शीर्षण्याः प्राणाः" इत्यत्र। ननु "गुहाशया निहिताः सप्त सप्त" इति वीप्सा श्रूयते, सा सप्तभ्योऽतिरिक्तान् प्राणान् गमयतीति। नैष दोषः, पुरुषभेदाभिप्रायेयं वीप्सा प्रतिपुरुषं सप्त सप्त प्राणा इति न तत्त्वभेदाभिप्राया सप्त सप्तान्येऽन्ये प्राणा इति। नन्वष्टत्वादिकापि संख्या प्राणेषूदाहृता कथं सप्तैव स्युः। सत्यमुदाहृता विरोधात्त्वन्यतमा संख्याध्यवसातव्या, तत्र स्तोककल्पनोपरोधात् सप्तसंख्याध्यवसानं वृत्तिभेदापेक्षञ्च सङ्ख्यान्तरश्रवणमिति गम्यते। अत्रोच्यते" भा० "हस्तादयस्तु स्थितेऽतो नैवम्" सू० "हस्तादयस्त्वपरे सप्तभ्योऽतिरिक्ताः प्राणाः श्रूयन्ते, "हस्तो वै ग्रहः स कर्मणातिग्राहेण गृहीतः, हस्ताभ्यां हि कर्म करोति" इत्येवमाद्यासु श्रुतिषु। एवं स्थिते च (अष्टादिसंख्यत्वे) सप्तत्वमन्तर्भावाच्छक्यते सम्भावयितुम्। हीनाधिकसङ्ख्याविप्रतिपत्तौ ह्यधिका सङ्ख्या संग्राह्या भवति, तस्यां हि हीनान्तर्भवति, न तु हीनायामधिका। अतश्च नैवं मन्तव्यं स्तोककल्पनानुरोधात् सप्तैव प्राणाः स्युरिति। उत्तरसङ्ख्यानुरोधात्त्वेकादशैव ते प्राणाः स्युः। तथा चोदाहृता श्रुतिः "दशेमे पुरुषे प्राणा आत्मैकादशः" इति। आत्मशब्देन चात्रान्तःकरणं परिगृह्यते करणाधिकारात्। ननु एकादशत्वादप्यधिके द्वादशत्रयोदशत्वे उदाहृते, न त्वेकादशभ्यः कार्यजातेभ्योऽधिकं कार्यजातमस्ति यदर्थम् अधिकं करणं कल्प्येत। शब्दस्पर्शरूपरसगन्धविषयाः पञ्च बुद्धिभेदास्तदर्थानि पञ्च बुद्धीन्द्रियाणि, वचनादानविहरणोत्सर्गानन्दाः पञ्च कर्मभेदास्तदर्थानि च पञ्च कर्मेन्द्रियाणि, सर्वार्थविषयं त्रैकाल्यवृत्ति मन एकमनेकवृत्तिकं तदेव वृत्तिभेदात् क्वचिद्भिन्नवद्व्यपदिश्यते "मनो बुद्धिरहङ्कारश्चित्तञ्च" इति। तथा च श्रुतिः कामाद्या नानाविधा वृत्तीरनुक्रम्याह "एतत् सर्वं मन एव" इति। अपि च सप्तैव शीर्षण्यान् प्राणानभिमन्यमानस्य चत्वार एव प्राणा अभिमताः स्युः स्थानभेदाद्ध्येते चत्वारः सन्तः सप्त गण्यन्ते, "द्वे श्रोत्रे द्वे चक्षुषी द्वे नासिके एका वाक्" इति। न च तावतामेव वृत्तिभेदा इतरे प्राणा इति शक्यते वक्तुं, हस्तादिवृत्तीनामत्यन्तविजातीयत्वात्। तथा "नव वै पुरुषे प्राणा नाभिर्दशमी" इत्यत्रापि देहच्छिद्रभेदाभिप्रायेणैव दश प्राणा उच्यन्ते, न प्राणतत्त्वभेदाभिप्रायेण "ना-